॥ ओ३म् ॥

# संस्कृत कथामञ्जरी

—श्री स्वामी वेदानन्द जी

प्रकाशक—

वैदिक साहित्य सदन (देहली)

संस्कृतांकुर का परिशिष्ट

# संस्कृत कथा मञ्जरी

[विरजानन्द संस्कृत परिषद् की परीक्षाओं में निर्धारित]

CHECKED 1973
Initial

लेखक:—

श्री स्वामी वेदानन्द जी तीर्थ

२१०
१२८
२८४२

प्रकाशक:—

वैदिक साहित्य सदन

आर्य समाज मन्दिर सीताराम बाजार, देहली

प्रथमावृत्ति १०००

सं० २०१० वि० मूल्य ।-)

# दो शब्द

जब विरजानन्द संस्कृतपरिषत् ने संस्कृत भाषा के प्रचार-विस्तार के लिए संस्कृत परीक्षायें प्रचलित करना स्वीकार किया, तब किसी भी सदस्य का यह विचार न था कि हमें ऐसी सफलता मिलेगी, सभी कहते थे कि यदि पचास परीक्षार्थी हो जायें तो बहुत समझना चाहिये। किन्तु हुआ क्या! ३७० परीक्षार्थी बैठे। यह तो आशातीत समाचार है और सत्य पूछो तो यह एक चमत्कार है। जब जान-अनजान सब ओर ऐसा हो रहा हो कि जिससे संस्कृत भाषा नाम शेष रह जाये, ऐसे समय में इतने परीक्षार्थियों का होना संस्कृत भाषा की महिमा का फल समझना चाहिये। संस्कृत भाषा के प्रति लोगों का स्वाभाविक प्रेम तथा परिषत् के परीक्षा मन्त्री के अदम्य उत्साह को इसका श्रेय मिलना चाहिये।

प्रथम बार परीक्षा के पश्चात् परिषत् ने निश्चय किया कि 'संस्कृतांकुर' पुस्तक के परिशिष्ट रूप में एक छोटी सी कथामञ्जरी भी लिखी जाय। तदनुसार यह कथामञ्जरी लिखी गई है। इसमें नये शब्दों का प्रयोग कम किया गया है। कथायें इतनी सरल हैं कि जिन्होंने संस्कृतांकुर का उचित रीति से अभ्यास किया है, उनको इन कथाओं के समझने में कुछ भी कठिनता न होगी।

संस्कृतांकुर की आलोचकों ने तथा जनता ने बहुत प्रशंसा की है आशा है यह भी उनको रुचेगी।

सं० २००६ पौष संक्रान्ति

वेदानन्द

ओ३म्

# कथा मञ्जरी

[ संस्कृतांकुर का परिशिष्ट ]

## प्रथमा कथा

पुरातने समये अस्मिन् भारते वर्षे रामो नाम प्रतापवान् राजा आसीत्। तस्य त्रयः भ्रातरः आसन्। तेषाम् नामानि क्रमशः भरतः, लक्ष्मणः, शत्रुघ्नः च आसन्। ते चत्वारोपि भ्रातरः परस्परम् अतिप्रीत्या अवर्तिषत। रामः तेषु ज्येष्ठः, गुणैः अपि श्रेष्ठः आसीत्। सर्वे भ्रातरः रामस्य आदरं कुर्वन्ति स्म (अकार्षुः)। रामः अपि तेषु अतिमात्रं स्नेहमकार्षीत्। तस्य नृपस्य रामस्य सीता नाम पतिव्रता भार्या आसीत्। या अद्यापि जनैः सादरं स्मर्यते। सा देवी बहून् क्लेशान् अनुभवति स्म। यदा पत्युः राज्याभिषेकसमयः प्राप्तः, तदा सः वनाय प्रस्थापितः। पतिव्रता सीता अपि तमनुगतवती। लक्ष्मणः अपि सहैव वनं गतः। त्रयः ते वने मुनिवृत्तिम् अवर्तिषत।

पूर्वं ते चित्रकूटे वासम् अकार्षुः । पश्चात् किंचित् विचार्य्य दण्डकारण्यं गताः, तत्र एकस्मिन् स्थाने पञ्च वटवृक्षाः आसन्, यस्मात् कारणात् तस्य स्थानस्य 'पञ्चवटी' इति नाम आसीत् । तत् स्थानम् अतिमनोरमम् आसीत् । तस्य सौन्दर्येण मुग्धाः सन्तः ते तत्र वासाय मनः अकार्षुः । ईशपूजने ऋषिसंगे च कालं ते नीतवन्तः । तस्मिन् घोरे वने राक्षसनामानः दुष्टाः नरघातकाः मनुष्याः अवात्सुः (वासम् अकार्षुः) । ते दुष्टाः ऋषिभ्यः दुःखं ददति स्म । ऋषयः स्वकष्टनिवारणाय रामम् अवादिषुः । रामः तेषां कष्टप्रदाम् कथाम् श्रुत्वा तस्याः निवारणाय अवादीत् । रामस्य एतत् वचनम् श्रुत्वा सर्वे ऋषयः हृष्टाः जाताः । दुष्टाः राक्षसाः रामस्य वार्त्ताम् श्रुत्वा अधिकम् उपद्रवम् अकार्षुः । तेषाम् उपद्रवं दृष्ट्वा श्रुत्वा च रामस्य क्रोधः जातः । सम्मुखयुद्धे ते राक्षसाः असमर्थाः, अतः छलं कपटं च कर्तुं प्रवृत्ताः । कपटी राक्षसराजः रावणः कपटमुनिवेषं धृत्वा भिक्षार्थम् सीतायाः समीपम् आगतः । यदा सीता भिक्षां दातुं प्रवृत्ता, तदा ताम् एकाकिनीं असहायां सीतां सः बलात् अपजहार (अपाहार्षीत्।)

यदा रामलक्ष्मणौ प्रत्यागतौ, सीताम् तत्र अदृष्ट्वा अत्यन्तं दुःखितौ अभूताम्। कुत्र गता सीता इति तयोः महती चिन्ता सञ्जाता। तस्याः अन्वेषणसमये एव तयोः सुग्रीवेण हनुमता च सह मैत्री संजाता। हनुमता प्रयत्नं कृत्वा ज्ञातम्, सीता रावणेन अपहृता, लंकायां दुःखम् सहमाना वर्तते इति। सीतायाः उद्धाराय राक्षसैः सह महद् युद्धं अभूत्। राक्षसराज्यस्य विनाशो जातः। रामेण नीतिनिपुणेन लंकाराज्यं राक्षसकुलोत्पन्नाय विभीषणाय दत्वा आर्य्यशीलं प्रकाशितम्



# तृतीया कथा

भारते वर्षे आसीत् महान् प्रतापी शान्तनुः नाम राजा। यौवने तस्य पत्नी मृता। तस्य एकः एव तनयः आसीत्, यस्य नाम देवव्रतः इति आसीत्। सः देवव्रतः अतीव सदाचारी धर्म्मात्मा अभूत्। शान्तनुना विद्याभ्यासार्थं विशेषतः धनुर्विद्याशिक्षणार्थं स भार्गवस्य परशुरामस्य गुरुकुले प्रेषितः। तत्र स बहूनि वर्षाणि वासं कृतवान् (अकार्षीत्)। तस्मिन् गुरुकुले भीष्मः सर्वान् वेदान् वेदाङ्गानि च अपाठीत्। धनुर्वेदम् सः विशेषेण अपाठीत्। राजशास्त्रस्य धर्म्मशास्त्रस्य च सः महान् पण्डितः अभूत्। पितुः प्रसन्नतायै स आजन्मब्रह्मचर्य्यव्रतं कृतवान्। तस्य इमां घोरां दुश्चरां प्रतिज्ञाम् श्रुत्वा 'भीष्मोऽयम्, भीष्मोऽयम्' इति सर्वे अवादिषुः। ततः प्रभृति 'भीष्म' इति तस्य नाम प्रसिद्धं जातम्।

तस्य आसन् त्रयः भ्रातृव्या(भ्रातृपुत्राः)एको धृतराष्ट्रः, द्वितीयः पाण्डुः, तृतीयः विदुरः। धृतराष्ट्रः जन्मान्धः, अभूत्, अतः कुरुकुलपरम्परानुसारेण सः राज्याधिकारी न

अभूत् । पाण्डुः राजा कृतः । स यौवने क्षयरोगेण रुग्णः जातः, पर्वतम् च गतः । तत्र तस्य पञ्च पुत्राः जाताः । पत्नीप्रमादात् सः मृतः । कुन्ती पञ्च पुत्रान् गृहीत्वा हस्तिनापुरम् आजगाम (आगमत्) । भीष्मेण ते पौत्राः स्नेहेन पालिताः वर्धिताः च । पाण्डुपुत्रेषु धृतराष्ट्रपुत्राः दुर्योधनादयः ईर्ष्याम् अकार्षुः तेषु परस्परं कलहं कर्वाणे भीष्मः वारंवारं सन्धिम् अकारयत् ।

भूपस्य पुत्राः वयम् इति पाण्डुपुत्राः राज्ये स्वाधिकारम् अवादिषुः । वस्तुतः राज्याधिकारः तु धृतराष्ट्रस्य, वयं च तस्य तनयाः, अतो राज्ये अस्माकम् अधिकारः, न च पाण्डुपुत्राणाम् इति । अयं भावः शनैः शनैः प्रवृद्धः अभूत् । भीष्मः अपि न अशकत् एतं विवादं शमयितुम् । ज्ञानी भीष्मः मनसि पाण्डवान् सत्यस्थान् जानन् अपि केनापि कारणेन तेषां पक्षं न अकार्षीत् । इदं तु सर्वथा सत्यम्, यत् समये-समये भीष्मः पाण्डवपक्षस्य सत्यताम् अपि मेने (अमंस्त) । तस्य समक्षे द्रौपद्याः अपमानम् दुःशासनः अकार्षीत् । दुर्योधनः तदा अहसीत् । भीष्मः किमपि न अवादीत् । अद्य अपि लोकाः आश्चर्यं

कुर्वन्ति, भीष्मः किमर्थं न किमपि अवादीत् इति । यदि स तदानीं किमपि अवदिष्यत्, इदं निश्चितम् यत् महद् अनर्थकारि युद्धं न अभविष्यत् । किं विचार्य्य भीष्मः न किमपि न अवादीत्, इति न कोपि जानाति । अपरम् इदम् आश्चर्यम्, यत् पाण्डवान् सत्यस्थान् जानन् अपि सः युद्धे दुर्योधनपक्षे युद्धम् अकार्षीत् । यद्यपि भीष्मः वयसा कृष्णात् वृद्धतरः, तथापि कृष्णं सः बहु मेने ( अमंस्त ) । कृष्णः अपि तस्मिन् आदरबुद्धिम् अकार्षीत् । नीतिशास्त्रस्य यानि तत्वानि तेन उक्तानि, तानि महाभारतस्य शान्ति-पर्वणि अनुशासनपर्वणि सङ्कलितानि सन्ति । ततो ज्ञायते, अयं पितामहः न केवलं वयसा वृद्धः, अपितु ज्ञानेन अपि वृद्धः ।



# चतुर्थी कथा

महाभारतयुद्धात् अनन्तरं शनैः शनैः भारतवर्षम् अवनतिम् अगमत् । महाविद्वांसः वैज्ञानिकाः, महर्षयः, भूपाः बहवः युद्धेन क्षपिताः । तदानीं न धर्म्मोपदेशकाः अवशिष्टाः, न च धर्म्मव्यवस्थापकाः भूपाः शेषाः स्थिताः । सर्वत्र अव्यवस्था जाता । न धर्मभयं तदानीम् आसीत्, कस्यापि न च राजभयम् । तदा जनाः कुमार्गे प्रवृत्ताः सन्तः अखाद्यानि अखादिषुः, अवद्यानि अवादिषुः, अपाठ्यानि अपाठिषुः । तेन जनानां संस्काराः विचाराः च मलिनाः जाताः । प्रमादस्य आलस्य च वृद्धिः शनैः-शनैः अभूत् । उपदेशकानाम् अभावात् राजभयस्य च अपगमात् अन्यदेशेषु विविधानि मतानि प्राचलिषुः । तत्र वैदिकधर्म्मस्य क्रमात् लोपः एव जातः । भारतेऽपि सुदृढस्य व्यवस्थापकस्य अभावात् अनेकानि राज्य-चक्राणि प्राचलिषुः । समस्ते भारतेवर्षे न एकः कोपि एतादृशः सत्ताधारी शासकः अवशिष्टः यस्य निदेशं सर्वे

मन्येरन् । भारतस्य अव्यवस्थां ज्ञात्वा परदेशीयाः साहसिकाः इमं देशम् आक्रान्तवन्तः । इतिहासतः ज्ञायते, एकस्मिन्काले भारतस्य विशालं भागं पारसीकाः अधिकृतवन्तः, तस्मिन् भागे अपघ्नस्थानम्, सिन्धुसौवीरं, सौराष्ट्रं, पञ्चाम्बुप्रदेशः अपि आसन् । तदा यवनदेशीयः अलक्षेन्द्रः पारसीकान् पराजित्य भारतम् अपि आक्रान्तवान् । पारसीकविजेता अलक्षेन्द्रः भारतीयैः वीरैः प्रताडितः, यत् सः स्वजीवने अपि सन्दिग्धो जातः । येन केनापि प्रकारेण सः स्वप्राणान् रक्षितुं शशाक (अशकत्) । तदानीं सिन्धोः महानदस्य पश्चिमतटवर्तिनि प्रदेशे मोरीनामकानां क्षत्रियाणाम् आधिपत्यम् आसीत् । तस्य मोरीवंशस्य शिरोमणिः अदम्योत्साहः, स्वदेशस्य पराधीनतायाः सदा ग्लानिं कुर्वाणः खण्डितंभारतं भूयः अखण्डितं विधातुम् इच्छन् महामतिचाणक्यशिष्यः चन्द्रगुप्तमौर्यः स्वगुरुं शरणम् अगमत् । गुरुशिष्यौ मिलित्वा यदकार्ष्टां तस्य कथां तु पुनः कदाचित् वदिष्यामः । किन्तु इदं निस्सङ्कोचम् अत्र वक्तुं शक्यते, यत तौ 'यत्र ब्रह्म च क्षत्रं च उभौ सम्यञ्चौ चरतः'

इति वेदवचनं यथार्थम् अकार्ष्टाम् । यथा श्रीकृष्णेन महात्मना भारतम् एकच्छत्रं कृतम्, तथा आभ्यां गुरुशिष्याभ्यां चाणक्यचन्द्रगुप्ताभ्यां भारतम् पुनः एकं कृतम् । यः भाग विदेशीयानां यवनानाम् अधिकारे आसीत्, सः अपि भागः पुनः भारतस्य अवयवः कृतः । अलक्षेन्द्रस्य मृत्युतः पश्चात् तदीयसेनापतिना पुनः आक्रमणं कृतम्, किन्तु स्वदुहितृदानेन वाह्लीक-(बलख-बुखारा) पर्य्यन्तदेशत्यागेन च आत्मनः प्राणान् रक्षितुं शशाक (अशक्नत)। ऐतिहासिकाः वदन्ति, यः चाणक्यः स एव वात्सायनमुनिः न्यायदर्शनस्य भाष्यकारः । कदा कोपि चाणक्यः चन्द्रगुप्तः च आविर्भूय इदं पुनः खण्डितं भारतवर्षम् अखण्डितम् विधास्यतः ? रोदनं कुर्वन्तः वदाम—'को देशम् उद्धरिष्यति' इति । पुरा तु खण्डितं सत् अपि भावे एकम् आसीत् । अधुना तु भावेषु अपि वैषम्यं जातम् । ईश्वर ! दयानिधे ! दयां कुरु ।

# पञ्चमी कथा

भो बालकाः ! कथाम् कथयामि ! सावधानेन मनसा शृणुत । श्रवणकाले मा क्रीडत । मा किमपि खादत ।

पुरा अस्माकम् देशः धनधान्येन सदा पूर्णः आसीत् । अत्र विद्यायाः प्रचारः अपि प्रचुरः आसीत् । एतैः गुणैः आकृष्टाः सर्वदेशीयाः विद्वांसः विद्यावर्धनाय अत्र आगमन् । धनलोलुपाः अन्यदेशीयाः शासकाः अस्मात् देशात् धनं हर्तुम् एतम् देशम् आगमन् । प्रायः बहुवारं ते पराजिताः सन्तः किंचित् प्रदाय एव प्रतिनिवृत्ताः । केचन बलिनः अपि आसन् । तैः अयं देशो जितः । पराजिताः अपि भारतीयाः निश्चिन्ताः न अतिष्ठन् । सदा कमपि उपायम् शत्रूणां निष्कासनाय अकार्षुः । ते अक्रीडिषुः, अखादिषुः, किन्तु तेषां मनसि शत्रूणां विनाशाय विचारः सदा प्रचण्डः अतिष्ठत् । विरोधिभिः अस्माकम् इतिहासग्रन्थाः दग्धाः, अनेन इतिहासपरम्परा लुप्ता । तथापि वृद्धैः कथमपि वाचिकाभिः कथाभिः सा परम्परा रक्षिता । ततः

ज्ञायते अस्माकम् पूर्वजाः अतिकर्मठाः पुरुषार्थिनः स्वदेश-रक्षणे सदा कटिबद्धाः आसन्। स्त्रियः ततोपि अधिकतराः तत्पराः अभूवन्।

पुरातनी इयं कथा, अस्याः कालं निर्देष्टुं कोपि न शक्नोति। तदानीम् अस्मिन् देशे एतावद् धनम् आसीत्, यत् तस्य गणनाम् कर्तुं न कोपि समर्थः अभूत्। धनबहु-लतायाः फलम् प्रायः आलस्यम् भवति। तया धनवृद्ध्या अस्माकम् पूर्वजाः अपि प्रमादिनः संजाताः। तान् भोग-विलासरतान् ज्ञात्वा राक्षसनामकाः विदेशीयाः एतं देशम् आक्रान्तवन्तः। एतं देशं स्वाधिकारे कृत्वा अतिमात्रम् अत्या-चारम् अकार्षुः। तेषु राक्षसनामकेषु विदेशीयेषु मनुष्येषु केपि मनुष्यखादकाः अपि आसन्। ते अवसरं लब्ध्वा आर्य्यान् हत्वा अखादिषुः। विलासवातपीडिताः आर्याः राक्षसान् निष्कासयितुं न अशक्नुन्। किं कर्तव्यविमूढाः सन्तः हतबुद्धयः अभूवन्। यद्यपि अत्यन्तं दुःखिताः आसन् आर्य्याः तदानीम्, तथापि कोपि उपायः तेषाम् न प्रत्य-भात्। राक्षसैः आर्य्याणाम् सर्वस्वम् अपहृतम्। तेन आर्य्याः निर्धना जाताः। तेषु केचित् पर्वतेषु स्वम्

आश्रयम् अकार्षुः। शत्रुविनाशाय ते सदा उपायम् चिन्तितवन्तः। तेषु मध्ये एका युवतिः स्वदेशभक्तिरता देशावस्थाम् विलोक्य भृशम् कातरा आसीत्। पुरुषान् कर्म्मरहितान् दृष्ट्वा सा चिन्तितवती। अहम् अस्मिन् देशे उत्पन्ना। अस्य देशस्य जलेन वायुना च जीवामि। अस्य-एव देशस्य अन्नेन परिपुष्टा अस्मि। मया एव देशोद्धाराय यत्नः कर्त्तव्यः। यदि पुरुषाः न कुर्वन्ति स्वीयं कर्त्तव्यं, मा नाम कुर्वन्तु। किन्तु स्त्रीभिः कुतः न कर्तव्यम्, विशेषतः मया किमिति न कर्त्तव्यम्। एवम् मनसि विचार्य्य सखिभिः सह तया मन्त्रितम्। भ्रातृणाम् समक्षेऽपि अयं विचारः तया प्रस्तुतः। सर्वाः तस्याः सख्यः एनं विचारम् स्वीकृतवत्यः, भ्रातरः अपि सर्वे तस्याः अनुगमने मतिम् अकार्षुः। सखीनाम् भ्रातृणाम् च सहमतिम् विदित्वा सा एकां सेनाम् अकार्षीत्। ताम् सेनाम् गृहीत्वा सा शत्रूणाम् अविदिता एव तेषाम् शिविरे प्रविष्टा, सहसा सेनाम् आगताम् विदित्वा राक्षसाः पलायिताः, पलायमानाः बहवः मारिताः। तस्याः प्रथमेन आक्रमणेन त्रस्ताः सन्तः राक्षसाः किंकर्त्तव्यविमूढाः

जाताः। तया स्वसेना प्रोत्साहिता। एतेन विजयेन प्रसन्नाः सन्तः बहवः आर्य्याः प्रत्यक्षरूपेण तस्याः घनेन जनेन सहायताम् अकार्षुः। इत्थम् स्वकीयेभ्यः धनस्य जनस्य सहायताम् प्राप्य सा वीरांगना शत्रून् अस्मात् देशात् बहिष्कर्तुं समर्था अभूत्।

शत्रुभिः देशे शून्ये सति आर्यैः सा सबहुमानम् सत्कृता अर्चिता अभिनन्दिता। वृद्धैः युवकैः बालकैः स्त्रीभिः तस्यै आदरप्रदर्शनाय तस्याः प्रतिमा स्थापिता। याम् प्रतिमां विलोक्य सोत्साहाः अभूवन् तदानींतनाः आर्याः। काले गते सति यदा वैदिकविचाराः लुप्तप्रायाः अभूवन् तदा ताम् लोकोत्तराम् मनुष्येतरां च मत्वा देवी-भावेन तस्याः प्रतिमां परमेश्वरवत् पूजयितुम् प्रवृत्ताः जनाः। तेन कारणेन विस्मृतवन्तः तदीयां वीरतां शूरतां देशभक्तिं च। यत् कर्म पुरुषाः न अशकन् कर्तुम्, सा, कौशलेन अकार्षीत्, अतः सा सत्यं पुरुषेभ्यः उत्कृष्टतरा।

तस्याः माननीयायाः वीरशिरोमण्याः देव्याः पूजितं नाम दुर्गा इति।

यदा भारते एतादृश्यः वीरांगनाः आसन्, तदा

अयम् देशः सर्वेषाम् देशानाम् शिरोमणिः आसीत् । इतिहासात् ज्ञायते यत् अनेकवारम् अस्य देशस्य उद्धारः स्त्रीभिः कृतः, तत्संस्मृतिसंरक्षणाय सर्वाः ताः दुर्गानाम्ना स्त्रियः इतिहासे अङ्किताः । दुर्गायाः अनुकरणात् सर्वाः ताः दुर्गाः एव। तासाम् सर्वासाम् कथाः एकरूपाः एव । अत्यन्तप्राचीनसमयस्य एतासाम् कथानाम् विस्तरः विस्मृतिपथं गतः, सारमात्रम् कृतज्ञैः आर्य्यैः रक्षितम् कदाचित् कस्मिंश्चिद् विलुप्ते विरोधिभिः दग्धे आसाम् दुर्गाणाम् कथाः विस्तृताः स्युः ।

पुरातनीषु जातिषु एका आर्या जातिः जीवति । तत्र कारणम् एद्देशीयानाम् संस्कृतेर्महत्त्वम्। अस्याम् संस्कृत्याम् स्त्रीणां स्थानम् अतिगौरवास्पदम् अस्ति । भोः बालकाः बालिकाः च ! एताम् कथां मनसि कृत्वा स्वदेशरक्षायै सदा तत्पराः भवत ।

# षष्ठी कथा

प्राचीनसमये भारतमहादेशस्य मगधनामके प्रदेशे एकः धर्मात्मा ब्रह्मज्ञानी राजा आसीत्। तस्य धर्म्मात्मनः ब्रह्मज्ञानिनः भूपस्य नाम 'जनकः' इति आसीत्। योगिनी नामिका तस्य भार्य्या आसीत्। सा योगिनीदेवी एकाम् दुहितरम् असूत, यस्याः नाम पितरौ 'सीता' इति अकार्ष्टाम्। मातापितृभ्याम् सीता अतिस्नेहेन लालिता पालिता संवर्द्धिता, सर्वासु विद्यासु च शिक्षिता। विवाह-योग्ये वयसि जाते तस्याः स्वयंवर विधानेन दशरथ-पुत्रेण रामेण सहः विवाहः जातः। आर्य्याणाम् स्त्रीणाम् पतिवरणे आसीत् अधिकारः। तस्य अधिकारस्य प्रयोगाय एकः महोत्सवः भवति स्म। तस्य नाम स्वयंवरमहः। तस्मिन् नानादिग्देशेभ्यः विवाहाभिलाषिणः युवानः आगच्छन्ति स्म। तेषां युवकानाम् परिचयः तत्र घोष्यते स्म। यं युवानं वृणोति स्म कन्या, तस्याः गले पुष्प-मालाम् अर्पयति स्म।

सीतायाः अपि एतादृशः स्वयंवरमहः तस्याः मातापितृभ्याम् कारितः। तस्मिन् उत्सवे बहवः राजपुत्राः अन्ये च प्रतिष्ठिताः युवानः सर्वजातीयाः समागताः। सर्वेषाम् यूनाम् गुणाः तत्र तत्परिचितैः यथायथम् श्राविताः। सर्वम् श्रुत्वा सीतायैः राज्ञः दशरथस्य पुत्रः रामः अरोचिष्ट। सीता तस्य गले वरमालाम् अर्पितवती। एतत् ज्ञात्वा अन्ये सर्वे युवानः स्वं स्वं स्थानं प्रति प्रस्थिताः। विश्वामित्रस्य ऋषेः परामर्शात् राज्ञा जनकेन राजानं दशरथम् सपरिवारम् आनेतुम् दूताः अयोध्यायाम् प्रेषिताः। अयोध्यां प्राप्य ते दूताः राज्ञः दशरथस्य सेवायाम् उपस्थिताः निवेदनमकार्षुः, यत् श्रीमतः ज्येष्ठः पुत्रः गुणैः अभिरामः श्रीरामः राज्ञः जनकस्य दुहित्रा श्रीमत्या सीतया स्वयंवरे वृतः। अधुना वेदमर्य्यादया विवाहविधिः सम्पादनीयः अस्ति। स च विधिः श्रीमतः उपस्थितौ एव विधेयः इति मर्यादाविदः वेदज्ञाः कथयन्ति। अतः हर्षोत्फुल्लस्वान्तः मिथिलाधिपतिः सबहुमानम् भवन्तम् आमन्त्रयते। भवतः दिदृक्षाप्रतीक्षायाम् उत्सुकः तिष्ठति। अतः श्रीमान् मिथिलावासिनः जनान् राजानं च पुनात

इति अस्ति प्रार्थना। एतत् श्रुत्वा राजा दशरथः तान् दूतान् यथाविधि सत्कृतवान्। राजपरिवारेण परामृश्य मन्त्रिभिः सचिवैः अमात्यैः च संमन्त्र्य स्वपुत्रविवाह-विधि-सम्पादनाय मिथिलाम् प्रति प्रस्थितः। तस्य आगमन-वार्त्तां श्रुत्वा मैथिलाः पौरजानपदाः स्त्रियः बालाः वृद्धाः युवानः तस्य 'स्वागतं' कर्त्तुं प्रत्युद्गताः। तम् दशरथं राजानं तस्य परिजनं च एकस्थाः सन्तः ते मैथिलाः पुष्पैः अवाकिरन्। जनकः राजा स्वनूतनं सम्बन्धिनम् महाराजम् दशरथम् विलोक्य अत्यन्तम् प्रसन्नो जातः। यथासमयं उभयपक्षीयैः विद्वद्भिः निर्दिष्टया रीत्या विवाहः सम्पन्नः (सम्पादितः)। लक्ष्मणस्य भरतस्य शत्रुघ्नस्य अपि विवाहाः राजपरिवार कन्याभिः तदानीम् एव जाताः। कतिचिद् दिनानि राजाः दशरथः तत्र उषित्वा मिथिला-धिपतिना अनुज्ञातः परिवारेण पुत्रैः स्नुषाभिः च सह अयोध्यां प्रत्यागतः। अयोध्यायाम् श्रीरामादीनाम् विवाहोत्सवस्य उपलक्ष्ये सर्वाणि गृहाणि उत्पताकानि जातानि, राजमार्गाः तोरणस्रग्भिः अलंकृताः। अयोध्या तदा स्वयं नववधूरिव दृश्यते स्म। सर्वे तत्रत्याः जनाः प्रसन्नाः लक्ष्यन्ते स्म।

कियतिचित् काले गते सति राजा दशरथः आत्मानं वृद्धम् अन्वभूत् । तस्य मनसि रामं युवराजं कर्त्तुं विचारः उत्पन्नः । एतदर्थम् तेन प्रजानाम् सम्मतिः अपेक्षिताः । प्रजाः राज्ञः एतम् विचारम् श्रुत्वा अति प्रसन्नाः अभूवन् । राज्ञः विचारम् ताः सर्व्वसम्मत्या स्वीकृतवत्यः । अमात्यादयः तु पूर्व्वम् एव अस्मिन् अर्थे सम्मताः आसन् । पुरोहितप्रवरस्य वसिष्ठस्य अनुमत्या राज्याभिषेकदिवसः नियतः । दैवात् रामस्य विमाता कैकेयी एतस्मिन् अर्थे विमता जाता । तस्याः आग्रहात् रामः वनं प्रेषितः । पतिव्रता सीता अपि स्वधर्मं जानती तम् अनुपालयन्ती पत्या साकम् वनं अगमत् । वने पत्या सह बहून् क्लेशान् असहिष्ट । राजभवनोचिता सा पत्या सह वनाद् वनम् अभ्रमीत् । परन्तु कदापि शोकः न कृतः तया ।

दुष्टेन रावणेन अपहृता भगवती सीता । तेन बहुधा विलोभिता अपि सा स्वधर्म्मं न अत्याक्षीत् । नानाविधान् क्लेषान् सः राक्षसः तस्यैः अदात् , किन्तु सा कथमपि स्वधर्म्मात् न विचलिता । अनेन ज्ञायते सा यथार्था धर्म्मिष्ठाः । स एव यथार्थः धर्म्मात्मा यः विपत्सु अपि

धर्म्मस्य त्यागं न करोति। घोरायाम् आपदि अपि सीता पतिव्रतधर्म्मस्य त्यागं न अकार्षीत्। अतः एव सा अद्यापि सर्वैः सज्जनैः सादरं स्मर्यते।

पतिविरहे सा अरोदीत् किन्तु मनसि कमपि हीनं विचारम् न अकार्षीत्। पत्या पुनर्मिलनस्य आशया सा प्राणान् धारितवती। प्राणधारणाय च भोजनम् अपि अकार्षीत्।

सती सीता ईश्वरभक्ता आसीत्। उभे वेले सा श्रद्धया सन्ध्यावन्दनम् अकार्षीत्। सीतालोपेन भृशं दुःखितः रामः तस्याः अन्वेषणाय सर्वत्र वने अभ्रमीत्। रावणेन सीता अपहृता इति ज्ञात्वा सः लङ्काम् आक्रान्तवान्। तत्र तुमुलम् युद्धम् अभूत्। युद्धे रावण सपरिवारः हतः आसीत्। विजयम् लब्ध्वा सीताम् आदाय रामः चतुर्दश वर्षाणि व्यतीत्य अयोध्याम् पुष्पकविमानेन आगतः। सर्वे पुरवासिनः तस्य भूरि भूरि अभिनन्दनम् अकार्षुः।

सीता अनुपमादेवी। अन्यदेशीयानाम् इतिहासे एतादृशी पतिभक्तानारी दुर्लभाः। यावन्तं कालं सूर्यः

तपति । चन्द्रः च प्रकाशते, वायुः च वाति, नद्यः वहन्ति, तावन्तं कालं सीतायाः नाम स्थास्नु । नारीणाम् आदर्शभूता सीता कस्य नाम न स्यात् पूजनीया । तस्याः अनुकरणम् एव यथार्था पूजा । धन्या भारतभूमिः, यत्र सीता उत्पन्ना । धन्यौ तस्याः मातापितरौ । धन्यः च रामः, यस्य सा पत्नी । धन्यं च इक्ष्वाकुकुलम्, येन ईदृशी स्नुषा प्राप्ता ।

अद्य नारीणाम् न तादृशः समादरः यादृशः पूर्वम् भारते आसीत् । हा ! हन्त ! ते हिनो दिवसाः गताः ॥



## सप्तमी कथा

अस्मिन् संसारे यदा वैदिकधर्मस्य प्रचुरः प्रचारः आसीत्, तदा सर्वत्र शान्तिः प्रीतिः सुनीतिः अराजीत् । सर्वे जनाः धार्मिकाः धनाढ्याः सदाचारनिरताः आस्तिकाः आसन् । न कोऽपि नरः अशिक्षितः आसीत् । स्त्रियः पुरुषाः च सन्ध्यावन्दनपरायणाः अग्निहोत्रकर्त्तारः च आसन् । दुराचारं कोऽपि न अज्ञासीत् । सर्वत्र विविधान् यज्ञान् जनाः अनुतिष्ठन्ति स्म, तेन समये यथेष्टा वृष्टिः अभूत् । अतः अन्नस्य प्रचुरता आसीत् । न कोऽपि मनुष्यः क्षुधार्त्तः तदानीम् अभूत् । मनुष्याणाम् का कथा, पशवः अपि हृष्टाः पुष्टाः च अभूवन् । एतस्याः समृद्धेः कारणात् सर्वे सुप्रसन्नाः परस्परं प्रीतिमन्तः आसन् यतः सर्वे समृद्धाः आसन् अतः न कोऽपि अन्यस्य समृद्धिम् दृष्ट्वा ईर्ष्याम् अकार्षीत्, प्रत्युत हर्षम् अकार्षीत् । भारतं वर्षं तु तदा सर्वेषां देशानां मुख्यम् आसीत् । अत्र बहवः ज्ञानिनः ध्यानिनः ऋषयः मुनयः शिल्पिनः अभूवन्, येभ्यः विद्या-

ग्रहणाय अन्येभ्यः देशेभ्यः महान्तः विद्वांसः अत्र आगच्छन्ति स्म । अत्रत्याः राजानः अपि अति प्रभावशालिनः आसन् । अन्येषु देशेषु च तेषाम् शासनम् आसीत् । महान्तः तपस्विनः प्रचारकाः अस्माद् देशात् देशान्तराणि गत्वा सद्धर्म्मस्य सद्विद्यायाः च प्रचारम् अकार्षुः । यतः तदानीम् खाद्यस्य पेयस्य च भूमा आसीत् अतः कोपि मनुष्यः कस्यापि प्राणिनः हिंसाम् न अकार्षित् ।

धनस्य विपुलता एव आर्याणां पतने कारणम् जाताः। ते विलासिनः प्रमादिनः च जाताः । प्रमादात् तेषु बहूनि व्यसनानिउत्पन्नानि । व्यसनेभ्यः केचन क्षीणाः अपि जाता । ते स्वीयां क्षीणतां निराकर्त्तुम् असमर्थाः सन्तः अन्येषु समृद्धेषु ईर्ष्याम् अकार्षुः । तेन परस्परम् वैरम् उत्पन्नम् एतादृशम् वैरम् एव महाभारत युद्धस्य कारणम् । तस्मिन् महायुद्धे जनस्य धनस्य च महान् क्षयः अभूत् । राज्यशासनम् अपि दुर्बलम् जातम् । सुप्रबन्धस्य अभावात् प्रचारकाः अपि धर्म्मस्य प्रचाराय न अगमन्, तेन तत्र आचारस्य विचारस्य च शिथिलता जाता । यथा सूर्य्ये अस्तंगते महान्तः क्षुद्राः च विविधाः प्रदीपाः प्रज्वाल्यन्ते,

तथा वैदिकधर्म्मसूर्य्ये लुप्तप्राये जाते नाना मतमतान्तरदीपाः समुद्भूताः। तेषु मतेषु कैश्चित् हिंसामयाः यज्ञाः प्रचालिताः। यद्यपि वेदे तु अयम् आदेशः अस्ति "पशुम् मा हिंसीः" तथापि एतैः एतं मन्त्रं पठित्वा यज्ञार्थं पशुघातः आरब्धः। तेन सर्वत्र पशुहत्या प्रसृता। ताम् पशुहत्याम् निवारयितुम् महात्मना बुद्धेन कश्चन यत्नः कृतः।

महात्मा बुद्धः नृपस्य शुद्धौदनस्य सुतः आसीत्। तस्य पूर्वम् नाम सिद्धार्थः इति। बाल्ये एव सः विरक्तः आसीत्। एकदा एकम् वृद्धम् दृष्ट्वा स्वसारथिम् अप्राक्षीत्। किम् इदम्? अयम् किमर्थम् इत्थम् चलति। सारथिना उक्तम्—राजकुमार! अयम् वृद्धो जातः, चलितुं न शक्नोति। राजकुमारेण पुनः पृष्टम्—किम् अहम् अपि वृद्धो भविष्यामि? सारथिः उक्तवान्—इयम् अवस्था सर्वेषाम् प्राणिनाम् स्वाभाविकी इति। एतत् श्रुत्वा राजकुमारः अतीव दुःखितः अभूत्। राजमहिलम् च निवृत्य गतः, तत्र चिन्तामग्नः अभूत्। एकदा पुनः रुग्णम् एकम् मनुष्यम् अद्राक्षीत्, तेन भृशं दुःखितः सः राजभवनम्

प्रत्यागतः। पुनः चिन्ताम् अकार्षीत्। पुनः कदापि एकं मृतं मनुष्यम् श्मशानं प्रति नीयमानम् दृष्ट्वा सारथिम् अप्राक्षीत्—किम् इदम्? सः अवादीत्—राजकुमार! अयं मृतः पूर्वम् अयम् भवान्-इव अक्रीडीत्, अखादीत्, अचालीत्। एतस्य प्राणाः शरीरम् त्यक्त्वा बहिर् निरसृताः, अधुना अयम् न खादति, न पिबति, न वदति, न क्रीडति, न चलति, न श्वासम् गृह्णाति. किमपि न करोति। अतः एनम् श्मशानं नयन्ति, अग्नौ स्थापयित्वा अस्य दाहम् करिष्यन्ति। एतत् श्रुत्वा व्याकुलो भूत्वा राजकुमारः पुनः अप्राक्षीत्। किम् मम अपि एषा दशा भविष्यति। तेन उक्तम्—राजकुमार! सर्वेषाम् अवश्यम् इयम् दशा भवति, राजा वा भवेत्, रङ्कः वा। राजकुमारः सारथिम् अवादीत्—रथम् निर्वर्तय, न अहम् अत्र संसारे भोग्यं पश्यामि। तम् सिद्धार्थं सदा चिन्तालीनं दृष्ट्वा तस्य पिता तस्य चिन्तानिवारणाय बहून् उपायान् अकार्षीत्, किन्तु सफलः न अभूत्। अन्ततः तस्य विवाहम् सः रचितवान्। विवाहस्य फलम् एकः पुत्रः। यदा पुत्रजन्मसमाचारः तेन श्रुतः, तदा पुनः तस्य प्रतिबोधः जातः। गृहम् त्यक्त्वा

सः वनम् अव्राजीत् । बहुभ्यः गुरुभ्यः स उपदेशं गृहीतवान्, किन्तु तस्य हृदये शान्तिः न जाता । षड् वर्षाणि यावत् सः घोरम् तपः अकार्षीत् । गयानगरे वटवृक्षस्य मूले तपः कुर्वतः तस्य प्रतिभातम्—बुद्धः असि । तदा प्रभृति सः बुद्धनाम्नाः प्रसिद्धः अभूत् । स्थानात् स्थानं गत्वा सः सदाचारस्य प्रचारम् अकार्षीत् । यज्ञेषु पशुहिंसां दृष्ट्वा दयालुः सः अत्यन्तं खिन्नः जातः । प्राणिहिंसावारणाय तेन महान् उद्योगः कृतः । स अवादीत्, न अहम् नूतनं किमपि मतम् प्रचारयामि, पुरातने आर्य्यधर्म्मे ये दोषाः कुतश्चित् आगताः, तान् निवारयामि । अशीतिवर्षाणि सः अजीवीत्, निरन्तरं प्रचारम् अकार्षीत् । अष्टवर्षवयस्कं स्वपुत्रम् अपि सः भिक्षुम् अकार्षीत् , तदा प्रभृति बालानाम् संन्यासदीक्षा प्रवृत्ता । हन्त ! विचित्रम् एतत् । यः पशुहिंसां वारयितुम् स्वप्राणानाम् बलिम् दातुम् उद्यतः आसीत् तस्य महाभागस्य अनुयायिनः प्रायः सर्वे मांसभक्षकाः सन्ति । अतः केचन कथयन्ति स न मांसभक्षणस्य विरोधी, किन्तु पशुहिंसाविरोधी । स महान् महात्मा इति अत्र न कोपि सन्देहः ।

---

# अष्टमी कथा

आसीत् पुरा काले अस्मिन् भूतले एकः राजा। यः रात्रौ अन्यम् वेषम् कृत्वा स्वे राज्ये भ्रमणम् अकार्षीत्। एकदा रात्रौ भ्रमणम् कुर्वन् सः एकस्य कुटीरय समीपम् अयासीत्। तत्र पति-पत्न्योः वार्ताम् अश्रौषीत्। पत्नी पतिम् अवादीत्, जनाः कथयन्ति श्रीमान् महान् विद्वान् इति। परन्तु अहम् भवतः विद्यायाः किमपि चमत्कारं न पश्यामि। पतिः अवादीत्—प्रिये! यदा अहम् नृपस्य प्रधानन्यायाध्यक्षः भविष्यामि, तदा त्वम् मम बुद्धेः विद्यायाः चमत्कारम् द्रक्ष्यसि इति।

राजा एताम् वार्ताम् श्रुत्वा निभृतः तिनिवृत्तः। आगामिनि दिने स राजा तस्य ब्राह्मणस्य समीपं स्वभृत्यम् प्रेषितवान्। दूतः अवादीत्। राजा त्वाम् आह्वयति। सः भूपस्य समीपे गतः। राजा तम् दृष्ट्वा अवादीत्, अद्य प्रभृति भवान् अस्माकम् राज्यस्य प्रधानन्यायाध्यक्षः इति। सः ब्राह्मणः राज्ञः शासनम् स्वीकृतवान्।

एकदा स राजा रात्रौ भ्रमणं कुर्वन् केनापि राजकर्मचारिणाः निरुद्धः। क्रुद्धः राजा तम् घातितवान्। आगामिनि दिने स राजा तम् न्यायाध्यक्षम् अवादीत्—यदि अस्य हत्याकर्त्तुः अन्वेषणम् सप्ताहे न भवति, भवतः शिरश्छेदम् भविष्यति। षष्ठस्य दिनस्य समाप्तौ राजा पृष्टवान्, किम् हत्याकर्त्ता लब्धः। न्यायाध्यक्षः अवादीत्, अधुना तु एकं दिनम् अवशिष्टम् अस्ति।

अन्तिमे दिने न्यायाध्यक्षः भूपस्य समीपे एकम् पत्रम् प्रेषितवान्, तत्र लिखितवान्, भवान् एव हत्याकर्त्ता, अतः न अहम् अत्र कार्यम् करोमि। यदि राजा अपि प्रजाजनस्य घातकः स्यात् कथं शान्तिः भवेत् इति।

सर्वे जनाः न्यायाध्यक्षस्य बुद्धिचातुर्यस्य प्रशंसाम् अकार्षुः। राजा अपि स्वीयम् दोषम् स्वीकृतवान्, तस्य च बहुमानम् अकार्षीत्। किन्तुः न्यायाध्यक्षः राजकार्य्यम् त्यक्त्वा स्वकुटीरे गत्वा छात्रान् पाठयति स्म।

# नवमी कथा

महात्मनः बुद्धस्य उपदेशैः प्रतीयते यत् सः महात्मा स्वसमये प्रचलितानाम् दोषाणाम् प्रदर्शने निवारणे च यत्नवान् आसीत्। ईश्वरविषये प्रायः मौनम् एव सः अवालम्बिष्ट। एतेन तदीयैः पश्चाद्भाविभिः शिष्यैः ईश्वरानङ्गीकारे तस्य अभिप्रायः ज्ञातः। तस्मात् ईश्वरवादिभिः सह तेषाम् बहवः शास्त्रार्थाः जाताः, ईश्वरसत्ताखण्डने बहवः ग्रन्थाः तैः लिखिताः। ईश्वरविरोधे बौद्धानाम् आग्रहः एतावान् प्रवृद्धः, यत् ते महात्मनः बुद्धस्य उद्देश्यम् एव विस्मृतवन्तः। तस्य फलम् इदम् जातम्, यत् यस्मात् गर्तात् जनताम् उद्धर्तुम् स महात्मा यत्नम् आकार्षीत् ( अयतिष्ट ), तस्मिन् एव गर्ते बौद्धाः स्वयं निपतिताः। तेषु मांसभक्षणम्, मद्यपानम्, परस्त्रीगमनम् अन्ये च दोषाः बलवत्तया प्रविष्टाः। येषाम् दोषाणाम् निवारणे बुद्धमहात्मा अयतिष्ट ते तु जनतातः न गताः, अपितु केचन अन्ये समागताः बौद्धानाम् प्रभावतः अकृत-

विद्याः बालाः अपि संन्यासिनः अभूवन्, स्त्रियः अपि प्रकामम् परिव्राजिकाः अभूवन्, तेन देशे महती अव्य-वस्था उत्पन्ना, स्त्रीपुरुषाणाम् सहवासफलम् दुराचाररूपेण प्रस्फुटितम्। बौद्धानाम् विहारेषु (मठेषु) विपुला सम्पत्तिः संजाता, सम्पत्तिमदात् उन्मत्ताः सन्तः भिक्षवः स्वकर्तव्यं विस्मृतवन्तः। अतः तेषु जनतायाः आदरभावः अपि विनष्टः। यावन्तम् कालम् बौद्धभिक्षवः लोकसेवाकार्य्यम् अकार्षुः, तावन्तं कालम् लोके तेषाम् प्रभावः स्थिरः अस्थात्। तेषु लोकसेवाविमुखेषु जातेषु विलासपङ्कनिमग्नेषु तेषाम् इयान् ह्रासः अभूत्, यत् तेषाम् जन्मभूमौ कोपि तेषाम् नामग्रहणम् अपि न अकार्षीत्। तदानीम् वैदिक-कर्मकाण्डस्य ज्ञानकाण्डस्य उपासनाकाण्डस्य च सर्वथा उच्छेदः जातः। एतादृशे विनाशकरे समये भारतस्य दाक्षिणात्ये प्रदेशे केरलनामके स्थाने श्रीशङ्कराचार्य्यस्य जन्म अभूत्। बाल्ये वयसि सः व्याकरणादीनि शास्त्राणि उपनिषदादिकं च पठित्वा वैदिकधर्म्मस्य पुनरुत्थाने सयत्नः अभूत्। सः प्रचण्डतार्किकः अतीवमेधावी विद्वान् आसीत्। स्थाने स्थाने सः बौद्धपण्डितैः शास्त्रार्थम्

अकार्षीत्, सर्वत्र सः विजयी अभूत्। राजानः साधारणाः च जनाः बौद्धमतं परित्यज्य वैदिकधर्म्मं गृहीतवन्तः। श्रीशङ्कराचार्य्यः स्वमतप्रचारार्थं भारतवर्षस्य चतसृषु दिक्षु चतुरः मठान् स्थापितवान्। हिमालये ज्योतिर्मठम्, उत्कलप्रदेशे भूगोवर्धनम्, पश्चिमे दिग्विभागे द्वारकामठम्, दाक्षिणात्ये प्रदेशे शृङ्गेरीमठम् अकरोत्। तस्य शिष्यैः प्रशिष्यैः प्रचण्डवेगेन शाङ्करमतस्य प्रचारः कृतः। तेन बौद्धमतस्य जैनमतस्य च महती क्षतिः जाता। केचन बौद्धाः विदेशेषु गताः। इत्थम् सर्वत्र पुनः वैदिकधर्म्म-प्रचारः जातः। किन्तु वस्तुतः अयम् अपि न आसीत् विशुद्धः वैदिकधर्म्मः। बौद्धाः अवादिषुः—अचेतनं विहाय न अस्ति कापि चेतनसत्ता। श्रीशङ्कराचार्य्यः तेषाम् विपक्षे अवादीत्, न अस्ति किमपि जडं वस्तु, यद् अस्ति तत् सर्वं चैतन्यम्, तत् च ब्रह्म एव। ब्रह्मातिरिक्तम् न किमपि सत्यम् इति। वेदे तु त्रयः पदार्थाः नित्याः गदिताः। अयम् श्रीशङ्करसिद्धान्तात् महान् भेदः वैदिकसिद्धान्तस्य।

# दशमी कथा

श्रीशङ्कराचार्य्यात् पश्चात् अस्मिन् देशे महान्तः मतस्थापकाः अन्ये अपि आचार्य्याः उत्पन्नाः। तेषु इमे अत्यन्तं प्रसिद्धाः—(१) श्रीरामानुजः (२) श्रीमध्वाचार्य्यः (३) श्रीनिम्बार्कः (४) श्रीवल्लभः इति। शङ्कराचार्य्यस्य एतेषां च आचार्य्याणां मतानाम् आधारभूताः ग्रन्थाः—(१) उपनिषदः (२) ब्रह्मसूत्रम् = वेदान्तदर्शनम् (३) श्रीमद्भगवद्गीता च। एतस्य ग्रन्थसमूहस्य पारिभाषिकम् नाम 'प्रस्थानत्रयी' इति। श्रीशङ्कराचार्य्यस्य सिद्धान्तः अद्वैतवादः अर्थात् ब्रह्मातिरिक्तम् किमपि वस्तु जगति न अस्ति, यत् किंचित् दृश्यते, इदम् सर्वं मिथ्या एव। श्रीरामानुजाचार्य्यः स्वसिद्धान्तम् 'विशिष्टाद्वैतवादम्' अवादीत्। सः अवादीत्, ब्रह्म तु एकम् एव, किन्तु चिदचिद्भ्याम् तद्विशिष्टम् अर्थात् ब्रह्मातिरिक्ताः सन्ति अन्ये चेतनाः अचेतनाः च। अयम् आचार्य्यः विष्णुम् परमं देवम् अमंस्त। मध्वाचार्य्यः द्वैतवादी। निम्बार्कः द्वैताद्वैतवादी। एतेषाम् आचार्य्याणाम् व्याख्याभिः एते ग्रन्थाः व्याकुलिताः। शङ्कराचार्य्यस्य अनुयायिनः कथमपि

शैवाः जाताः, रामानुजादीनाम् आचार्याणाम् अनुगामिनः वैष्णवाः उच्यन्ते । एतेषाम् उपास्यः देवः विष्णुः । एकदेवताभक्ताः सन्तः अपि वैष्णवाः परस्परम् भिन्नाः । एते सर्वे मतप्रवर्त्तकाः तदनुयायिभिः 'वैदिकधर्म्मपुनः प्रतिष्ठापनाचार्य्याः' निगद्यन्ते । परन्तु मध्वाचार्यात् विना एतेषु केनापि आचार्य्येण वेदे न कोपि यत्नः कृतः। मध्वाचार्य्यस्तु ऋग्वेदस्य कतिचित् सूक्तानि व्याख्यातवान्।

एतस्मिन् अन्तरे भारते राज्यपरिवर्त्तनम् अभूत् । आर्य्याणाम् स्वच्छन्दं शासनम् लुप्तम् । पूर्वम् विविधानाम् यवन-(मुस्लिम) वंशानाम् अत्र आधिपत्यम् जातम् । आर्य्यैः, महान्तं प्रयत्नं कृत्वा, यदा यवनराज्यस्य उच्छेदः कृतः, तदानीम् देशस्य दुर्भाग्यात् आर्याणाम् पारस्परिकेण अनैक्येन आंग्लानाम् प्रभुत्वम् जातम् । यवनैः स्वसमये आर्याः वैदिकधर्मात् बलात्कारेण पातिताः । आंग्लैः स्वमतप्रचाराय विविधानि प्रलोभनानि दर्शयित्वा इमे स्वधर्म्मात् च्याविताः । यवनानाम् असिः यत् कर्त्तुं न अशकत् , तत् आंग्लानाम् मसिः अकार्षीत् । असंख्याताः आर्याः स्वधर्म्मम् त्यक्त्वा ख्रीष्टमते प्रविष्टाः । एताम् अवस्थाम् अवलोक्य ख्रीष्टीयैः प्रचारकैः आर्यधर्म्मस्य सर्वनाशस्य तिथिनिश्चयः कृतः ।

तेषाम् दुर्भाग्यात् भारतस्य पश्चिमे देशे सौराष्ट्रे कश्चित् अपूर्वमेधाशक्तिसंपन्नः यतिः उत्पन्नः। स्वगृहे पितृव्यस्य स्वसुः च मरणं दृष्ट्वा मरणवारणमहौषधस्य अन्वेषणाय यौवनारम्भे एव गृहम् त्यक्तवान् सः। तस्य तीव्रम् वैराग्यभावं ज्ञात्वा मातापितरौ विवाहपाशे तं बद्धुम् तत्परौ अभूताम्। यदा सर्वा विवाहसामग्री प्रस्तुता आसीत्, कमपि किमपि अविज्ञाप्य स पुनरनागमनाय गृहात् बहिर्जगाम। बहूनि दुष्कराणि तपांसि तेन तप्तानि, बहूनि वर्षाणि बहूनि तपांसि तप्त्वा सः कनखले पूर्णानन्द-सरस्वतीस्वामिनः सविधे आजगाम, तेन जरठेन महात्मना सः उक्तः, अहम् अधुना अतीव वृद्धः जातः। अस्ति मथुरानगरे मम योग्यः शिष्यः विरजानन्दसरस्वती स्वामी। तस्य समीपे त्वम् याहि, सः तव कामान् पूरयिष्यति। तस्य महात्मनः वचनं मञ्जूरीकृत्य सः वर्षचतुष्टयानन्तरं मथुराम् अगात्। एतस्मिन् अन्तरे भारतीयप्रथमस्वातन्त्र्यमहासंग्रामे सः सम्मिलितः अभूत्। विरजानन्देन स्वामिना दयानन्दस्वामिनः हृदयकपाटम् उद्घाटितम् यद् न्यूनत्वं तत्र आसीत्, तत् सकलं प्रपूरितम्।

विद्यासमाप्तिसमये विरजानन्देन दक्षिणा याचिता—

वेदधर्मस्य लोपः जातः, अस्य पुनरुद्धारः कार्य्यः। दयानन्देन वेदस्य प्रचारे स्वप्राणाः त्यक्ताः। आर्य्याः बलिनः कृताः। सर्वमतस्थाः तेन अनुगृहीताः। तस्य आलोचनाप्रकाशेन सर्वे स्वस्वदोषाणां दूरीकरणे प्रयत्नं कुर्वन्ति, स्वमतानि परिष्कुर्वन्ति। अद्य आर्य्यजातिम् कोऽपि मरणासन्नाम् न वदति। इयम् दयानन्दस्य दया।

दयानन्दाय वेदाः अरोचिषत। वेदाः सर्वेषाम् मनुष्याणां कल्याणाय प्रवृत्ताः। 'मनुर्भव' = 'मनुष्यः भव' इति वेदस्य मननीयः उपदेशः। दयानन्देन संस्कृत-भाषायाः उद्धारः कृतः। भारते ऐक्यसम्पादनाय तेन एव महात्मना सर्वप्रथमम् विचारस्य ऐक्यम्, आचारस्य ऐक्यम्, उच्चारस्य (भाषायाः) ऐक्यम्, लिपेः ऐक्यम् घोषितम्। स्वराज्यस्य अनिवार्यता अपि तेन सर्वप्रथमं प्रकाशिता प्रचारिता च। सः ब्रह्मवादी सन्नपि लोकस्य परलोकस्य च उभयस्य उत्कर्षसाधने प्रेरितवान्। सः न केवलं परलोकसाधने प्रेरयति, लोकस्य उन्नतये अपि प्रेरयति। लोकं विना परलोकसाधनम् असंभवम् इति तस्य उपदेशः। परलोकसाधनं विना लोकोन्नतिः पतनकारिणी इति सर्वजनप्रत्यक्षम्।

---

सम्राट् प्रेस पहाड़ी धीरज देहली।